Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 23

No. of Printed Pages – 7

VU–94–Sans. Vangmay

# वरिष्ठ उपाध्याय परीक्षा, 2023

## संस्कृत वाङ्मय (अनिवार्यः)

**समय** : 3 **घण्टे** 15 **मिनट (सपाद होरात्रयम्)**

**पूर्णांक** : 80

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांङ्काः अनिवार्यतः लेख्याः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

## खण्डः – 'अ'

1) **वस्तुनिष्ठप्रश्नाः–**

i) "गणपतेर पत्यादि" इति विग्रहे रुपं भवति – [1]

अ) गाणपतम्  ब) आदित्यः

स) प्राजापत्यः  द) शैवः

ii) "उत्सादिभ्योऽञ्" इति सूत्रम् अस्ति – [1]

अ) गणसूत्रम्  ब) संज्ञासूत्रम्

स) विधिसूत्रम्  द) अधिकारसूत्रम्

iii) "लः परस्मै पदम्" इति सूत्रेण का संज्ञा भवति? [1]

अ) पद संज्ञा  ब) घु संज्ञा

स) आत्मनेपद संज्ञा  द) परस्मैपद संज्ञा

iv) "कर्तरिशप्' इति सूत्रेण कः प्रत्ययो भवति? [1]

अ) अप्  ब) शप्

स) अम्  द) तम्

v) शिववीरः निवसति स्म – [1]

अ) प्रतापदुर्गे  ब) जयदुर्गे

स) सिंहदुर्गे  द) रक्तदुर्गे

vi) "शिवराजविजयः" कति विरामेषु विभक्तः अस्ति ? [1]

अ) षट्सु  ब) पञ्चसु

स) त्रिषु  द) चतुर्षु

vii) "यः सुचरितैः पितरं प्रीणयेत्" सः कः? [1]

अ) पुत्रः  ब) मित्रः

स) सज्जनः  द) नरः

viii) सद्विद्या यदि किं ..........? [1]

अ) पातकैः  ब) तपसा

स) अगुणेन  द) धनैः

ix) मनुष्यस्य नाम विद्यते – [1]

अ) प्रमदा  ब) मनुजः

स) कन्या  द) भगिनी

x) मातुः पिता – [1]

अ) पितामहः  ब) श्वशुरः

स) मातामहः  द) भ्रात्रीयः

xi) ज्योतिषशास्त्रम् अस्ति – [1]

अ) काल विधायकम्  ब) सूचना विधायकम्

स) विधि विधायकम्  द) संज्ञा विधायकम्

xii) कति वाराः? [1]

अ) नव  ब) दश

स) सप्त  द) एकादश

2) रिक्तस्थानानि प्रपूरयत् –

i) ''तेन रक्त ........... ।'' [1]

ii) मणिना भूषितः .......... किमसौ न भयङ्करः । [1]

iii) ''क एष मामनुत्तरयन् मुमुर्षुः ............ बधिरः।'' [1]

iv) ......... प्रथमः । [1]

v) वीरपत्नी वीरभार्या ........ च वीरसूः । [1]

vi) कर्कस्वामी च ........... । [1]

**3)** अतिलघूत्तरात्मकप्रश्ना:

i) ''शुक्राद्धन्'' इति सूत्रेण क: प्रत्ययो भवति? **[1]**

ii) ''प्रावृषेण्य:'' इत्यत्र प्रत्यय विधायकं सूत्रं लिखत। **[1]**

iii) 'भू' धातो: कोऽर्थ:? **[1]**

iv) गोपीनाथपण्डित: कस्य राजदूत: आसीत्? **[1]**

v) ''शुचिमनो यद्यस्ति तीर्थेन किम्'' इत्यस्य भावार्थ: क:? **[1]**

vi) ''सदसि वाक्पटुता'' इत्यस्य भावार्थो लेख्य:। **[1]**

vii) पुत्रस्य नाम द्वयं लिखत। **[1]**

viii) ''पितामह:'' इत्यस्य अर्थं लिखत। **[1]**

ix) अमरकोषस्य अपरंनाम किम्? **[1]**

x) अहोरात्रे कति प्रहरा: भवन्ति? **[1]**

xi) सिंहस्यधिपति क:? **[1]**

xii) ज्योतिषशास्त्रानुसारं सम्पूर्णब्रह्माण्डे कति ग्रहा: सन्ति? **[1]**

## खण्डः – 'ब'

4) ''दाक्षिः'' इति प्रयोगं साधयत । [2]

5) 'काकम्'' इति प्रयोगं साधयत । [2]

6) ''राष्ट्रियः'' इति प्रयोगं साधयत । [2]

7) ''दन्त्यम्'' इति प्रयोगं साधयत । [2]

8) ''भवसि'' इति प्रयोगं साधयत । [2]

9) ''भविष्यति'' इति प्रयोगं साधयत । [2]

10) ''लुटःप्रथमस्य डारौरसः'' इति सूत्रं व्याख्येयम् । [2]

11) शिवराजविजयस्य रचनाकारस्य सामान्यपरिचयो लेख्यः । [2]

12) भर्तृहरेः परिचयात्मकवाक्यद्वयं लिखत । [2]

13) मातुः चत्वारि नामानि लिखत । [2]

14) पत्युः चत्वारि नामानि लिखत । [2]

15) तिथिनामानि लिखत । [2]

16) एकस्मिन् वर्षे कति मासाः भवन्ति? नामानि लिखत । [2]

## खण्ड: – 'स'

17) अधोलिखितेषु कयोश्चिद् द्वयो: सूत्रयो: व्याख्या कार्या । [3]

क) "शिवादिभ्योऽण्"

ख) "मध्यान्म:"

ग) "संख्याया अवयवे तयप्"

घ) "क्रमादिभ्यो वुन्"

18) अधोलिखितयो: श्लोकयो: कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या । [3]

क) आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरा वृद्धिमतीच पश्चात् ।
दिनस्य पुर्वार्द्ध–परार्द्ध भिन्ना,
छायेव मैत्री खल–सज्जनानाम् ।।

ख) श्रोतं श्रुतेनैव न कुण्डलेन,
दानेन पाणिर्न तु कङ्कणेन ।
विभाति काय: करुणापराणां,
परोपकारैर्न तु चन्दनेन ।।

19) अधोलिखितेषु वाक्येषु केषाञ्चित् त्रयाणां संस्कृतानुवादो विधेय: । [3]

क) गाँव के दोनों ओर जल है ।

ख) उसे पढ़ना चाहिए ।

ग) जटा से सन्यासी ज्ञात होता है ।

घ) वृक्ष से पत्ता गिरा ।

ङ) विद्या से ज्ञान होता है ।

च) देवदत्त पाठ पढेगा ।

20) अधोलिखितेषु केषुचित् त्रिषु वाक्येषु रेखाङ्कितपदानि संशोधयत । [3]

क) <u>द्वौ</u> बालका: ।

ख) <u>नृपात्</u> वसुधां याचते ।

ग) <u>नेत्रस्य</u> काण: ।

घ) <u>बालकं</u> मोदकं रोचते ।

ङ) नम: <u>जनकम्</u> ।

च) स: पुस्तकं <u>पठन्ति</u> ।

## खण्डः – 'द'

21) अधोलिखितेषु कौचिद् द्वौ प्रयोगौ साधनीयौ । [4]

क) शिखावलः ।

ख) सामाजिकः ।

ग) रैवतिकः ।

घ) वैयाकरणः ।

22) अधोलिखितयोः गद्यांशयोः कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या । [4]

क) ततः संवृत्ते किञ्चिदन्धकारे धूप – धूमेनेव व्याप्तासु हरित्सु भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत – प्रत्यागतश्च विदधानः, प्रतापदुर्ग – दौवारिकः, कस्यापि पादक्षेपध्वनिमिवाऽश्रौषीत् ।

ख) गौरसिंह : – "अवगतः तत्पत्रमेव दर्शयामि" इति व्याहृत्य, उष्णीष सन्धौ स्थापितं कन्यापहारक – यवन – मृत – शरीरावस्त्रान्तः प्राप्तं पत्रं बहिश्चकार । सर्वेच विजयपुराधीशमुद्रामवलोक्य किमेतत् ? एतत् ? कथमेतत् ? कस्मादेतत् ? इति विज्ञासमानाः सोत्कण्ठा वितस्थिरे ।

23) अधोलिखितेषु कमप्येकं विषयमाश्रित्य निबन्धोलेखनीयः । [4]

क) मम प्रियः कविः

ख) परोपकारः

ग) संस्कृतं संस्कृतिस्तथा

घ) अस्माकं विद्यालयः

DO NOT WRITE ANYTHING HERE